# Shri Ganesha Bhujangam 1

# શ્રીગણેશભુજઙ્ગમ્ ૧

## Document Information

Text title : Ganesha Bhujangam 1

File name : ganbhuj.itx

Category : ganesha, bhujanga, shankarAchArya

Location : doc_ganesha

Author : Shankaracharya

Proofread by : Rocky Stars

Latest update : November 29, 1998, November 16, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

May 10, 2025

*sanskritdocuments.org*

# Shri Ganesha Bhujangam 1

## શ્રીગણેશભુજઙ્ગમ્ ૧

રણત્ક્ષુદ્રઘણ્ટાનિનાદાભિરામં
ચલત્તાણ્ડવોદ્દણ્ડવત્પદ્મતાલમ્ ।
લસત્તુન્દિલાઙ્ગોપરિવ્યાલહારં
ગણાધીશમીશાનસૂનું તમીડે ॥ ૧॥

ધ્વનિધ્વંસવીણાલયોલ્લાસિવક્ત્રં
સ્ફુરચ્છુણ્ડદણ્ડોલ્લસદ્બીજપૂરમ્ ।
ગલદ્દર્પસૌગન્ધ્યલોલાલિમાલં
ગણાધીશમીશાનસૂનું તમીડે ॥ ૨॥

પ્રકાશજ્જપારક્તરત્નપ્રસૂન-
પ્રવાલપ્રભાતારુણજ્યોતિરેકમ્ ।
પ્રલમ્બોદરં વક્રતુણ્ડૈકદન્તં
ગણાધીશમીશાનસૂનું તમીડે ॥ ૩॥

વિચિત્રસ્ફુરદ્રત્નમાલાકિરીટં
કિરીટોલ્લસચ્ચન્દ્રરેખાવિભૂષમ્ ।
વિભૂષૈકભૂશં ભવધ્વંસહેતું
ગણાધીશમીશાનસૂનું તમીડે ॥ ૪॥

ઉદઞ્ચદ્ભુજાવલ્લરીદૃશ્યમૂલો-
ચ્ચલદ્ભ્રૂલતાવિભ્રમભ્રાજદક્ષમ્ ।
મરુત્સુન્દરીચામરૈઃ સેવ્યમાનં
ગણાધીશમીશાનસૂનું તમીડે ॥ ૫॥

સ્ફુરન્નિષ્ઠુરાલોલપિઙ્ગાક્ષિતારં
કૃપાકોમલોદારલીલાવતારમ્ ।
કલાબિન્દુગં ગીયતે યોગિવર્યૈ-
ર્ગણાધીશમીશાનસૂનું તમીડે ॥ ૬॥

યમેકાક્ષરં નિર્મલં નિર્વિકલ્પં
ગુણાતીતમાનન્દમાકારશૂન્યમ્ ।
પરં પારમોઙ્કારમામ્નાયગર્ભં
વદન્તિ પ્રગલ્-ભં પુરાણં તમીડે ॥ ૭॥

ચિદાનન્દસાન્દ્રાય શાન્તાય તુભ્યં
નમો વિશ્વકર્ત્રે ચ હર્ત્રે ચ તુભ્યમ્ ।
નમોऽનન્તલીલાય કૈવલ્યભાસે
નમો વિશ્વબીજ પ્રસીદેશસૂનો ॥ ૮॥

ઇમં સુસ્તવં પ્રાતરુત્થાય ભક્ત્યા
પઠેદ્યસ્તુ મર્ત્યો લભેત્સર્વકામાન્ ।
ગણેશપ્રસાદેન સિધ્યન્તિ વાચો
ગણેશે વિભૌ દુર્લભં કિં પ્રસન્ને ॥ ૯॥

ઇતિ શ્રીમચ્છઙ્કરાચાર્યકૃતં ગણેશભુજઙ્ગપ્રયાતસ્તોત્રં
સમ્પૂર્ણમ્ ॥

*Shri Ganesha Bhujangam 1*

pdf was typeset on May 10, 2025

Please send corrections to *sanskrit@cheerful.com*